National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2017; 1(14): 117-120
© 2017 NJHSR
www.sanskritarticle.com

**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**आचार्यः जि. पद्मनाभम्**
संस्कृतविभागः,
श्रीवेङ्कटेश्वरविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# स्तोत्रसाहित्यम्

**आचार्यः जि. पद्मनाभम्**

**सारांशः – (Summary) -** अस्मिन् लेखे संस्कृतवाङ्मयस्य विशालपरम्परायाः गम्भीरं विवेचनं कृतम् अस्ति। अत्र काव्यस्य द्विविधं भेदं (दृश्य-श्रव्य) दर्शयित्वा तस्य विविधानां वर्गीकरणानां (पद्य-गद्य-चम्पू-मुक्तकादीनां) चर्चा क्रियते । लेखस्य मुख्यप्रतिपाद्यविषयः **स्तोत्रसाहित्यम्** अस्ति । 'गुणिनिष्ठगुणाभिधानं स्तोत्रम्' इति लक्षणानुसारं स्तोत्रं भगवतः स्वाभाविकगुणानां वर्णनं करोति। स्तोत्रसाहित्यस्य मूलं वेदेषु (विशेषतः ऋग्वेदे) अस्ति । तदनन्तरं पुराणेषु (यथा भागवत-ब्रह्मवैवर्तादिषु) तथा इतिहासेषु (रामायण-महाभारतयोः) एषा परम्परा कथं विकसिता, इत्यस्य सविस्तरं वर्णनमत्र क्रियते। अग्नि-सूर्य-रुद्र-दुर्गादीनां वैदिकसूक्तानि आधारीकृत्य एव परवर्तिनः कवयः (यथा कालिदास-शङ्कराचार्यादयः) विविधानि स्तोत्राणि रचितवन्तः इति लेखस्य निष्कर्षः ।

**कूटशब्दाः (Key Words) -** साहित्यम् **(शब्दार्थयोः साहित्यभावः),** दृश्य-श्रव्यकाव्यम् **(काव्यस्य मुख्यौ भेदौ),** स्तोत्रलक्षणम् **(गुणिनिष्ठगुणाभिधानम्),** अर्थवादः **(स्तुतिनिन्दान्यतरबोधकं वाक्यम्),** ऋग्वेदः **(स्तोत्रपरम्परायाः मूलस्रोतः),** अग्निसूक्तम् **(वैदिकस्तुतेः प्रथमं सोपानम्),** विष्णुसहस्रनाम **(महाभारतस्य प्रसिद्धं स्तोत्रम्),** आदित्यहृदयम् **(रामायणस्य सूर्यस्तुतिः),** शिवमहिम्नस्तोत्रम् **(पुष्पदन्तकृतं प्रसिद्धं स्तोत्रम्),** श्यामलादण्डकम् **(कालिदासस्य स्तुतिकाव्यम्)**

**काव्यभेदाः**

सहितयोः शब्दार्थयोः भावः साहित्यम् । इदमेव वाङ्मयमपीत्युच्यते। तत् वाङ्मयं वैदिकं लौकिकं चेति द्विविधम् । वैदिकं तु वेद-वेदाङ्गोपनिषद्-ब्राह्मणारण्यकत्वेन व्यवह्रियते। लौकिकं तु रामायण-भारत- भागवतादीनां सम्बन्धि भवति । लौकिकसाहित्यं दृश्यश्रव्यत्वेन द्विधा विभक्तम् । दृश्यकाव्यानि नाटक-प्रकरण-भाण-प्रहसन-डिम-व्यायोग-समवाकार-वीथी-अङ्ग-ईहामृगाख्यानि दशधा विभक्तानि । एतानि रूपकाणीत्युच्यन्ते । श्रव्यकाव्यापेक्षया दृश्यकाव्यं श्रेष्ठतममिति कथ्यते । एतन्मनसि निधाय आलङ्कारिकाः काव्येषु नाटकं रम्यम् इति कथयन्ति ।

वस्तुभेदेनापि काव्यं त्रिविधं वर्तते । प्रख्यातम् उत्पाद्यं मिश्रं चेति । प्रख्यातं पुराणप्रसिद्धं रामायणादि, उत्पाद्यं नाम कविकल्पितं कादम्बर्यादि । प्रख्यातोत्पाद्ययोः समानवर्णनं मिश्रं भवति ।

उदाहरणं शाकुन्तलम् – शाकुन्तलादि ।

काव्यप्रकाशकारो मम्मटोऽपि उत्तमकाव्यम्, मध्यमकाव्यम्, अधमकाव्यं चेति काव्यस्य त्रैवविध्यमाह, किन्तु पण्डितराजेन उत्तमोत्तमकाव्यमित्येकं संयोज्य काव्यस्य चातुर्विध्यं उक्तम् ।

**"तच्चोत्तमोत्तमोत्तममध्यमाधमभेदाच्चतुर्धा"** इति।

खण्डकाव्यानि तु लघुकाव्यानि मुक्तकानि इति वक्तुं शक्यते । मुक्तकं नाम एकस्य श्लोकस्य तदनन्तरश्लोकेन तत्पूर्वश्लोकेन वा सम्बद्धो न विद्यते । प्रत्येकं श्लोकस्य एको विषयः उच्यते । भावस्यापि इतर श्लोके न भवति । एवमेव स्तोत्रकाव्यमपि ।

**स्तोत्रकाव्यानि**

**'गुणिनिष्ठं गुणाभिधानं स्तोत्रम्'** इति स्तोत्रस्य लक्षणं कथयन्ति आचार्याः । संस्कृतवाङ्मये भक्ताग्रगण्यैः बहुभिः कविपुङ्गवैः स्वेष्टदेवतामधिकृत्य विरचितानि स्तुतिपरकाणि बहूनि स्तोत्रकाव्यानि काव्यप्रपञ्चे

विलसन्त्येव ।

श्री शङ्करभगवत्पादैः, श्री रामानुजाचार्यैः, मध्वाचार्यैः एवम् अन्यैः आचार्यवरेण्यैः तत्तद्देवता- प्रसंशनपरकाणि भजगोविन्द-शरणागति-दण्डकादि-गद्यरूपाणि, पद्यरूपाणि नितान्तं भक्तानां मनस्सु भक्तिभावजनकानि स्तोत्राणि संस्कृतसाहित्ये समुपलक्ष्यन्ते एव।

**स्तोत्रशब्दार्थः, स्तोत्रनिर्वचनं च**

स्तूयते अनेन इति व्युत्पत्या स्तौतेः "दाम्नीशस्युयुजः" इति सूत्रेण "ष्ट्रनि" प्रत्यये कृते स्तोत्रशब्दः उत्पन्नो भवति । अयं शब्दः देवताविषये प्रधानार्थकः, इतरत्र गौणार्थकः । अस्य स्तवः, स्तोत्रं, नुतिः, भूतार्थव्याहृतिः इत्यादयः पर्यायशब्दाः भवन्ति । अमरकोशानुसारं "स्तवस्तोत्रं स्तुतिर्नुतिः" इत्येते पर्यायशब्दाः । तेषु स्तवः इति स्तु-धातोः अप् प्रत्यये कृते भवति । स्तुतिः इति शब्दस्तु अस्मादेव धातोः क्तिन् प्रत्यये कृते निष्पद्यते । तथा च स्तुतिवाचकेन स्तोत्रशब्दे शब्दस्य 'भगवान् स्तूयते' इति अन्वर्थो भवति ।

करुणासमुद्रस्य गुणार्णवस्य भगवतः गुणानां स्वशक्तेः अनुसारं कीर्तनमेव स्तोत्रमिति उच्यते । "स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिस्तोत्रा" इति श्रीविष्णुसहस्रनामस्तोत्रेऽपि भगवान् स्तोत्रप्रियः इति ज्ञायते। एतेषां स्तोत्राणाम् अनेकधा पठनेन नवनवायमाना प्रीतिः उदेति । तथा च आर्योक्तिः अनेकशः संस्तुतमप्यनल्पा नवं नवं प्रीतिरहो करोति ।

**स्तोत्रलक्षणम्**

यथा काव्यानां नाटकादीनाञ्च अनुमतं लक्षणं लाक्षणिकैः आलंकारिकैः उच्यते, तथा स्तोत्राणां अनेकविधत्वात् समानं लक्षणं निर्देष्टुं न शक्यते । तथापि अस्माकं पूर्वाचार्याः केचन स्तोत्रलक्षणानि कथयन्ति, यत् गुणिनिष्ठं गुणाभिधानं स्तोत्रमिति । एते च गुणाः सर्वे भगवति एव सन्तीति कृत्वा अविद्यमानगुणाः अस्मिन् सन्तीति आरोप्यकथनं विद्यमानगुणानां परिपूर्णतया वर्णनमेव स्तोत्रमिति कथयन्ति ।

अविज्ञातं विजानतां "यतो वाचो निवर्तन्ते" इति श्रुति वचनानुसारम् असाध्यानां भगवद्गुणानां वर्णनमेव स्तोत्रमिति केचन निर्दिष्टवन्तः । हलायुधकोशे स्तोत्रमिति पदस्य अर्थवादः, स्तुतिः, ईशः, नुतिः, विकत्थनं, स्तवः, श्लाघवर्णना इति पर्यायपदानि सन्ति । ते सर्वे शब्दाः स्वाभाविकगुणाविष्करणपराः अत एव गुणिनिष्ठं गुणाभिधानं स्तोत्रं न तु गुणवर्णनम् । तस्मात् स्तु-धात्वर्थः केवललौकिकसुखविषये गौणार्थकः। लौकिकालौकिको-भयविधसुखसाधनविषये प्रधानार्थकः। श्रीद्वारिकाप्रसादचतुर्वेदी स्वरचितसंस्कृतशब्दार्थ- कौस्तुभनामके ग्रन्थे स्तोत्रमधिकृत्य एवं प्रत्यपादयत् ।

**स्तोत्रं प्रशंसा स्तुतिः बिरुदावलिः प्रशंसात्मकं गीतम् ।**
**कवितास्तुत्यात्मकश्लोकाः अत्रान्तिमत्रयोऽर्था विचार्याः ।। इति ।।**[1]

स्तोत्रव्युत्पत्तिविषये अनेकधा कथयन्ति । "अप्रगीतमन्त्रसाध्या स्तुतिः स्तोत्रम्" इति सायणाचार्यः वक्ति । गुणिनिष्ठं गुणाभिधानं स्तोत्रमिति मधुसूदनाचार्येण प्रोच्यते । विष्णुसहस्रनामभाष्ये श्रीशङ्करभगवत्पादाचार्येण स्तुवन्ति इत्यस्य गुणसङ्कीर्तनं कुर्वन्ति इत्यर्थो विहितः । अस्य शब्दस्य निर्वचनं यास्काचार्यः स्वकृते निरुक्ते नियमकाण्डे "स्तोता स्तवनात्" इति कथयति ।

**स्तोत्राणाम् आविर्भावः विकासश्च**

स्तुतिपूर्वकवाक्यानि अत्यन्तप्राचीनकालादपि दृश्यन्ते। ऋगादि चतुर्वेदाः देवतास्तुतिपराः सन्ति। प्रथमतः स्तोत्रसम्प्रदायः वेदे एव आरब्धः । प्राचीनतमे ऋग्वेदे भगवत्स्तुतिरस्ति। ऋच्यते भगवान् अनया इति ऋक् । ऋच् धातुः स्तुत्यर्थकः अतः ऋग्वेदः भगवत्स्तुत्यात्मकः भवति । यजुर्वेदादयः तदङ्गभूताः भवन्ति । ततः पुराणेषु इतिहासेषु च बहूनि स्तोत्राणि लभन्ते । श्रीमद्रामायणे महाभारते श्रीमद्भागवते च स्तुतिपूर्वकाणि वाक्यानि संदृश्यन्ते । भगवान् व्यासमहर्षिः सर्वलोकहिताय निदिध्यासनाय च भक्तिरसात्मकानि बहूनि स्तोत्राणि अरचयत् ।

**वेदपुराणेतिहासेषु स्तोत्रवैशिष्ट्यम्**

स्तोत्राणां मूलकत्वेन श्रीशङ्करभगवत्पादाचार्यस्य ब्रह्मसूत्रभाष्ये अयं स्लोकः निर्दिष्टोऽस्ति । यथा -

**अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।**
**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ।।**[2]

सकलमेव वाङ्मयं वेदादेव निस्सृतम् । वेदस्तु चतुर्धा विभक्तः ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्चेति । "ऋच्यते स्तूयते यथा सा ऋक्" इति व्युत्पत्या स्तवनप्रक्रियायाः प्रथमः आधारः ऋग्वेदो भवति । इयमेव स्तोत्र प्रक्रिया काव्यरूपेणापि परिलक्ष्यते। तदेवं रूपं रुद्राध्यायादौ यजुर्वेदे च दृश्यन्ते । तत्र नतिः निबद्धा एव । प्रार्थना अपि स्फुटाः "नमस्ते रुद्रमन्यवे", "मानस्तोके तनये मान आयुषि मा नो गोषु" इत्यादि स्तोत्ररूपं वैदिकं साहित्यं सुष्ठु दृश्यते ।

प्रतिपादितमेव निखिलस्य वाङ्मयस्य श्रुतिमूलकत्वं साहित्यविद्भिः । सा च श्रुतिः प्रकारान्तरेण पञ्चधा विभक्ता "विधि-मन्त्र-नामधेय-निषेध-अर्थवादरूपेण" । तत्र अर्थवादो नाम मीमांसकैः स्तुति-निंदान्यतरबोधकं वाक्यमिति प्रत्यपादि । स च चतुर्विधः – निन्दा, प्रशंसा, परकृतिः, पुराकल्पः इति भेदात् ।[3]

तत्र निन्दार्थवादो यथा - "असत्रं वा एतद्यदच्छन्दोगम्, अश्रुजं हि रजतं यो बर्हिषि ददाति पुरास्य संवत्सरागृहे रुदन्ति" इत्यादिः । तत्र **प्रशंसा यथा -** "शोभतेऽस्य मुखं य एवं वेद", "वायुर्वै क्षेपिष्ठा देवता, वायुमेव स्वेन भागधेनोपधावति", "स एवैनं भूर्ति गमयति" इत्येवमादिः। परेण महता पुरुषेणेदं कर्म कृतमिति प्रतिपादकोऽर्थवादः **'परकृतिः'** । यथा – "अग्निर्वा अकामयत" इत्यादिः। परप्रवक्तृकार्थादिप्रतिपादकः **'पुराकल्पः'**। यथा- "तमशपद्धिया धिया त्वा वध्यासुः इत्यादिः । तत्र निन्दार्थवादस्य विधेयान्यनिन्दाद्वारा विधेयप्राशस्त्यं **'परत्वम्'** । "अग्निर्वाऽकमायत" इत्यस्य अग्निदेवत्यो यागः अग्निना कृतत्वात् प्रशस्तः । आस्तिक्यात् इदानीमपि अन्यैः यजमानैः अवश्यं कर्तव्यः इति विधेयकर्मगतप्राशस्त्यद्वारा विधेयकवाक्यत्वम् ।

सोऽयमर्थवादः विधिरेषः, निषेधरेषः इति द्विविधः । तत्र "वायव्यं श्वेतमालभेत" इत्यादि विधिशेषाणां "वायुर्वेक्षेपिष्टा देवता" इत्यादीनामर्थवादानां विधेयार्थस्तावकतया अर्थवत्वम् ।[4] "बर्हिषि रजतं न देयम्" इत्यादिनिषेधशेषाणां "सोऽरोदीत्" इत्यादीनामर्थवादानां[5] तु निषेध्यनिन्दकतया इति। अतश्च लक्षणया प्राशस्त्यमर्थवादैः बोध्यते। तच्च प्राशस्त्यज्ञानं शब्दभावना-याम्मितिकर्तव्यतात्वेन संबध्यते।

एवमर्थवादरूपेण वेदेषु परिदृश्यमानं लौकिकसाहित्ये स्तोत्ररूपेण

परिणतं सत्काव्यरूपं बिभर्ति। कृत्स्नस्यापि भारतीयवाङ्मयस्य वेदार्थोपबृ्ंहणरूपत्वात् न केवलं लौकिकवाङ्गयस्य वेदार्थबोधकत्वमपितु वैदिकसम्प्रदायविभागानां धारकत्वम् ।
अर्थवादविशेषाः बहवः इतिहासपुराणेषु काव्येषु च प्रवेशिताः। ऋग्वेदीयसूक्तेषु बहुनामृचा ं देवाताप्रशंसात्मकरूपेण निबन्धः प्रसिद्धः । एवम् ऋक् सूक्तगतं प्रशंसात्मकमवलम्ब्यैव वाल्मीकिः, व्यासः, अन्ये च कवयः स्वकाव्येषु देवतागुणकर्मप्रशंसात्मकस्तोत्राणि कृतवन्तः ।
अपि च देवताह्वानाय तेषां स्तोत्ररूपतया प्रसिद्धा अर्थात् ऋग्भिः देवतानाम् आह्वानं क्रियते । हविर्ध ारकतया अग्नेः सर्वप्राधान्यं वर्तते । अतः प्रथमम् अग्निदेवतातः अग्निसूक्तम् आरभ्यते। मधुच्छन्देन प्रोक्त े अग्निसूक्ते अग्निदेवतास्तुतिः एवम् अस्ति -

**"अग्निमीळे प ुरोहितम्, यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।"**[6]

अनेन अग्निः यज्ञविषये सर्वप्रथमः, प्रकाशकः फलप्रदायकः इति स्तोत्ररूपेण विलसति । एवमेव सूर्य ः, वरुण ः, मरुत ्, उषस्, विद्युत् इत्यादीनामपि स्तोत्र ाणि सुप्रसिद्धानि भवन्ति । एतेषु उषस्सूक्तमपि स्तुतिप्राधान्य ं भजते । अपि च सा ऋग्वेदे प्रायेण वि ंशसूक्तैः स्तूयते । उषा नाम कान्तिमती इत्यर्थः । एवमेव ऋग्वेदे कण्वमहर्षिकृतरुद्रगानं रुद्रस्तुतिः इति ।

**यः शक्र इव सूर्यो हिरण्यमिव ।**
**रोचते श्रेष्ठो देवानां वसुः ।।**

रुद्रः सर्वदेवतानां श्रेष्ठः इति, सूर्यवत् दीप्तिमान्निति सुवर्णवत्प्रकाशस्वरूपः इति च रुद्रस्तुत्यां कण्वमहर्षिः अस्तुवत् ।
पुराणेषु विविधस्तोत्राणि दृश्यन्ते। तेषु श्री मद्भागवत पुराणं सुप्रसिद्धमस्ति । दैवानुग्रह सिध्यर्थं भगवद् स्तुतिपराणि स्तोत्राणि उपनिबद्धानि। तेषु नारायणकवचं इति सुप्रसिद्ध भवति। एवं भागवते सप्तम स्कन्धे प्रह्लाद कृत भगवत्स्तुतिरपि सुप्रसिद्धास्ति । तद्यथा -

**यस्मात्प्रियाप्रियवियोगसयोगजन्म**
**शोकाग्निना सकलयोनिषु दह्यमानः ।**
**दुःखौषधं तदपि दुःगतद्वियाहं**
**धूमन् भ्रमामि वद मे तव दास्य योग्यम् ।।**[7]
**यस्मिन् यतोयर्हियेन च यस्य यस्माद्**
**यस्मै यथा तदुतयत्स्वपरः परो वा ।**
**भावः करोति विकारोति पृथक्स्वभावः**
**सञ्चोदितस्तदखिलं भव तत्स्वरूपम् ।।**[8]
**स त्वं हि नित्यविजितात्म गुण स्वधाम्ना**
**कालो वशीकृत विसृज्य विसर्गशक्तिः ।**
**चक्रे विसृष्टमजयेश्वर सोढशारे**
**निष्पीश्यमानमुपकर्षविभोप्रपन्नम् ।।**[9]

अपि च तत्रैव दशमस्कन्धे द्वितीयोध्याये बह्मेशा नादिदेवगुणैः कृता परमपुरुष स्तुतिः।

**ब ाह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः ।**
**देवैः सानु चरैः साकं गीर्भिर्वृषणमैडयन् ।।**
**सत्यव्रतं सत्यपरं त्रिसत्यं सत्यस्य योनिं निहितं च सत्ये ।**
**सत्यस्य सत्यमृत सत्यनेत्रं सत्यात्मकं त्वां शरणं प्रपन्नाः ।।**[10]

श्री पद्मापुराणे प्रथमे सृष्टिखण्डे श्रीगणपतिस्तोत्रं

**"गणपतिविघ्नराजः लम्बतुण्डे गजाननः ।**
**द्वैमातुरश्च हेरम्ब एकदन्तो गणधिपः ।।"**

"विनायकश्चारूकर्णः पशुपालो भवात्मजः" इत्यस्मिन् स्तोत्रे आदौ "ओं नमोगणपतये" इति गणपतेर्मन्त्रः प्रोक्तः, ततः विघ्नराजः, एकदन्तः, विनायकः, पशुपालः इत्यादीनि प्रमुखानि द्वादशनामानि उक्तानि ।
एवमेव वराहपुराणे गणेशास्तोत्रं, गरुडपुरणे संकटहरणगणेशस्तोत्रं, ब्रह्मवैवर्तपुराणे गणेशकवचम्, गणेशनामाष्टकं, भविष्य पुराणे गणेशस्तवराजः च अन्तर्भवन्ति।
ब्रह्मवैवर्तपुराणे नारायणोक्त "दुर्गाकवचम्" इति स्तोत्रं दुर्गायाः वर्णनं स्तोत्ररूपेण अस्ति। नारदं प्रति नारायणेणोक्तमिदम् ।

**"श्रुणु नारद वक्ष्यामि दुर्गायाः कवचं शुभम्"** इति।

एवमेव कूर्मपुराणे देवीसहस्रनामस्तोत्रं, विष्णुपुराणे लक्ष्मीस्तोत्रं, मार्कण्डेयपुराणे नारायणीयस्तोत्रं, ब्रह्माण्डपुराणे ललितासहस्रनामस्तोत्रं इत्यादीनि स्तोत्राणि दृश्यन्ते।
स्तोत्रसाहित्ये परमं सुप्रसिद्धं "शिवमहिम्नस्तोत्रम्" ४० तम श्लोकयुक्तं, एतद् स्तोत्रं श्रीपुष्पदन्ताचार्येणोक्तम् -

**"बहुलरजसे विश्वोत्पत्ती भवाय नमो नमः**
**प्रबलतमसे तत्संहारे हराय नमो नमः ।**
**जनसुखकृते सत्वोद्रिक्तौ मुडायनमोनमः**
**प्रमहसि पदे निस्त्रैगुणये शिवायनमोनमः ।।"**

एवं शिवमहापुराणे विष्णुकृत "शिवसहस्रनामस्तोत्रम्" सुप्रसिद्धम् भवति। इदं स्तोत्रं शिवस्य नाम्नां सहस्रवर्णनं फलकथन पुरस्सरमिति।
एवमेव लिङ्गपुराणे "शिनामाष्टकम्", नारदपुराणे "महेश्वरस्तोत्रं, ब्रह्मपुराणे दक्षकृत" "शिवस्तोत्रम्", सौरपुराणे कुबेरकृत "शिवस्तोत्रम्", शिवमहापुराणे "शिवमहास्तोत्रं" "द्वादशजयेति-र्लिङ्गतोत्रम्" च सुप्रसिद्धम् ।
सर्वपापाविनाशन ं श्रीविष्णुसहस्रनामस्तोत्रं गरुडुराणे अन्तर्भवति। अत्र विष्णोः सहस्रनाम्नां वर्णनमस्ति। एवं श्रीभागवतपुराणे विष्णुस्तोत्रं, ब्रह्मवैवर्तपुराणे श्रीकृष्णस्तोत्रं च सुप्रसिद्धम् ।
ब्रह्मकृत "आदित्यस्तोत्रम्" ब्रह्मपुराणे अन्तर्भवति। अत्र भगवतः सूर्यस्य एकविंशतिनाम्नां कीर्तनमस्ति। तत्र कानिचन नामानि स्वरूपप्रतिपादकानि। तदनुसारं सूर्यः पिङ्गलवर्णः रक्तनेत्रः प्रकाशात्मकः शतृक्षयंकरः इत्यादि रूपेण वर्णित मस्ति। एवं भविष्यपुराणे सूर्यस्तवराजः, ब्रह्मवैवर्ते सूर्यस्तोत्रं च सुप्रसिद्धम्। एवमेव पराशरपुराणे हयग्रीवस्तोत्रं श्रीवेङ्कटेश्वराष्टोत्तर नामस्तोत्रं च सुप्रसिद्धम्। एवं पुराणेषु विविधस्तोत्राणि दृश्यन्ते।
इतिहासेष्वपि भगवद्विषयस्तुतिः दृश्यते। श्रीवाल्मीकि विरचिते आदिकाव्ये श्रीमद्रामायणे "आदित्यस्तोत्रम्" सुप्रसिद्धम्। एवमेव श्रीमद्रामायणे रावणवधाय ब्रह्मादि सकलदेवतागणैः एवं अभ्यर्थितः भगवान्नारायणः ।

**"एतस्मिन्नन्तरे विष्णुरूपायातो महाद्युतिः ।**
**शङ्खचक्रगदापाणिः पीतवासा जगत्पतिः ।।**
**ब्रह्माण च समागम्य तत्र तस्थौ समाहितः ।**

**तमनुवन् सुरास्सर्वे समभिष्ट्रयसन्नताः ।।[11] इति ।।**

एव मेव श्रीमन्महाभारतेऽनुशासनिकपर्वणि विष्णुसहस्र -नामस्तोत्रम् जगति प्रसिद्धं भवति। तथा च -

**"ततो देवास्सगन्धर्वाः सरुद्रास्साप्सरो गणाः ।**

**स्तुतिभिर्दिव्य रूपाभि स्तुष्टुवुर्मधुसूदनम् ।।[12] इति।।**

अपि च रणरङ्गे श्रीकृष्णादेशानुसारं अर्जुनः शत्रुविजयार्थं दुर्गास्तुति चकार। इदं स्तोत्रं त्रायोदशश्लोकसमन्वितम्। तथा च

नमस्तो ! सिद्धसेनानि ! आर्येमन्दरवासिन ! कुमारि ! कालि ! कपालि ! कपिले ! कृष्णपिङ्गले !

**भद्रकालि ! नमस्तुभ्यं महाकालिः ! नमोऽस्तुते**

**चण्डि ! चण्डे नमस्तुभ्यं ! तारिणि! वरवर्णिनि ।।[13] इति ।।**

एवमेव वनपर्व तृतीयोध्याये सूर्यस्य स्तुतिरपि दृश्यते। इत्येवं रीत्या रामायण भारतादि ग्रन्थेषु भगवत्स्तुतिः बहुविस्तृततया गोचरति । एवं रीत्या वेदपुराणेतिहासेषु स्तोत्रस्य स्थानं समुन्नतं भवति। तदनन्तरकालेऽपि स्तोत्राण्यनेकानि गोचरन्ति। एतेषां विषयरूपविभागं च परिशीलनीयम्। प्रथमतः देवतास्तुतिपर वाक्यान्येव स्तोत्र शब्देन व्यवहीयन्ते। तदनन्तरकाले राज्ञां प्रशंसा, तद्वारा धनादिकं प्राप्तुं स्तोत्राणि विरचितानि।

**स्तोत्रपरम्परा**

इदानीं लौकिक वाङ्गये विद्यमानानि स्तोत्राण्युद्दिश्य विचारयामः । तत् तावत् प्रथमं कविकुलगुरोः कालिदासस्य श्यामला दण्डके

**माणिक्यवीणामुपलालयन्तीं**

**मदालसां मञ्जुलवाग्विलासाम् ।**

**माहेन्द्रनीलद्युतिकोमलाङ्गीं**

**मातङ्गकान्यां मनसा स्मरामि ।।**

**चतुर्भुजे चन्द्रकलावतंसे कुचोन्नते कुङ्कुमरागशोणे।**

**पुंड्रेक्षुपाशांकुरापुष्पबाण हस्ते नमस्ते जगदेकमातः ।।**

माता मरकतश्यामा मातङ्गी मधुशालिनी कुर्यात् कटाक्षं कल्याणी कदम्बवनवासिनी ।।

**जयमातङ्गतनये जयनीलोत्पलद्युते ।**

**जयसंगीतरसिके जय लीलाशुकप्रिये ।।**

## ३. उपसंहारः (Conclusion)

संस्कृतसाहित्ये स्तोत्रसाहित्यस्य स्थानं न केवलं धार्मिकदृष्ट्या अपितु साहित्यिकदृष्ट्या अपि अतीव उन्नतम् अस्ति। वेदानां स्तुतिमन्त्राः एव कालान्तरे सरलयुक्तानि स्तोत्राणि अभवन्। इयं परम्परा भक्तस्य हृदयस्य भावं भगवता सह योजयति। लेखस्य परिशीलनेन ज्ञायते यत् स्तोत्राणि केवलं पूजापद्धतयः न सन्ति, अपितु तानि उच्चकोट्याः काव्यकलायाः निदर्शनमपि सन्ति। 'यतो वाचो निवर्तन्ते' इति श्रुतिवाक्यानुसारं यदा वाणी ईश्वरीयगुणानां वर्णने असमर्था भवति, तदा स्तोत्रसाहित्यमेव तस्य महिमानं प्रकटयितुं समर्थं साधनं भवति।

## सहायकग्रन्थसूची (Bibliography)


- **ऋग्वेदसंहिता (सायणभाष्यसहिता):** ग्रन्थकर्त्ता- महर्षि-वेदव्यासः, भाष्यकारः- सायणाचार्यः, प्रकाशकः- वैदिक संशोधन मण्डल, पुणे (महाराष्ट्रम्), प्रकाशनवर्षम् १९३३।
- **श्रीमद्भागवतपुराणम्:** ग्रन्थकर्त्ता- महर्षि-वेदव्यासः, प्रकाशकः- गीताप्रेस, गोरखपुर (उत्तरप्रदेशः), प्रकाशनवर्षम् २००१।
- **ब्रह्मसूत्रशाङ्करभाष्यम्:** ग्रन्थकर्त्ता- श्रीशङ्करभगवत्पादाः, प्रकाशकः- मोतीलाल बनारसीदास, देहली, प्रकाशनवर्षम् १९९०।
- **मीमांसापरिभाषा:** ग्रन्थकर्त्ता- कृष्णयज्वन्, सम्पादकः- स्वामी माधनवानन्द, प्रकाशकः- रामकृष्ण मिशन, कोलकाता (पश्चिमबङ्गः), प्रकाशनवर्षम् १९५०।
- **श्रीमद्रामायणम् (बालकाण्डम्):** ग्रन्थकर्त्ता- आदिकवि-वाल्मीकिः, प्रकाशकः- चौखम्बा सुरभारती प्रकाशन, वाराणसी (उत्तरप्रदेशः), प्रकाशनवर्षम् २०१५।
- **श्रीमन्महाभारतम् (भीष्म-अनुशासनपर्वणी):** ग्रन्थकर्त्ता- महर्षि-वेदव्यासः, प्रकाशकः- गीताप्रेस, गोरखपुर (उत्तरप्रदेशः), प्रकाशनवर्षम् १९९८।
- **अमरकोशः (नामलिङ्गानुशासनम्):** ग्रन्थकर्त्ता- अमरसिंहः, व्याख्याकारः- भानुदीक्षितः, प्रकाशकः- चौखम्बा संस्कृत प्रतिष्ठान, देहली, प्रकाशनवर्षम् २००२।
- **काव्यप्रकाशः:** ग्रन्थकर्त्ता- आचार्य-मम्मटः, सम्पादकः- आचार्य-विश्वेश्वरः, प्रकाशकः- ज्ञानमण्डल लिमिटेड, वाराणसी (उत्तरप्रदेशः), प्रकाशनवर्षम् १९८२।
- **संस्कृत-शब्दार्थ-कौस्तुभः (संस्कृत-हिन्दी कोशः):** ग्रन्थकर्त्ता- द्वारिकाप्रसाद चतुर्वेदी, प्रकाशकः- रामनारायणलाल बेणीमाधव, इलाहाबाद (उत्तरप्रदेशः), प्रकाशनवर्षम् १९५५।
- **स्तोत्ररत्नावलिः:** सङ्कलनकर्त्ता- हनुमानप्रसाद पोद्दार, प्रकाशकः- गीताप्रेस, गोरखपुर (उत्तरप्रदेशः), प्रकाशनवर्षम् २००२।
- **निरुक्तम्:** ग्रन्थकर्त्ता- यास्काचार्यः, सम्पादकः- लक्ष्मण स्वरूप, प्रकाशकः- मोतीलाल बनारसीदास, देहली, प्रकाशनवर्षम् १९६७।


**सन्दर्भ ग्रन्थः -**

1 संस्कृत-शब्दार्थ-कौस्तुभः (संस्कृत-हिन्दी कोशः)

2 ब्रह्मसूत्रशाङ्करभाष्यं-१- आद्याध्य ३ पादः २८ सूत्रम् ।

3 मीमांसा परिभाषा, पृष्टसंख्या २३

4 तैत्तिरीय संहिता, २ अष्टाकरम् १ अध्यायः १ मन्त्रम् १

5 तैत्तिरीय संहिता, १-५-१

6 Vedic Reader P.1

7 श्रीमद्भागवतम् ७, ९-१७

8 श्रीमद्भागवतम् ७, ९-२०

9 श्रीमद्भागवतम् ७, ९-२२

10 श्रीमद्भागवतम्, १०-२-२५-२६

11 श्रीमद्रामायणम्, १.२५.१६-१७

12 श्रीमन्महाभारतम्, अनु. ४.

13 श्रीमनमहाभारतं भीष्मपर्व २३-१-२